गोविन्दराजप्रपत्तिः

{॥ गोविन्दराजप्रपत्तिः ॥}

यश्चैकशैलनिकटे कमलापुरीश-

गोविन्दराजपदयोरकरोत् प्रपत्तिम् ।

तं वादिभीकरगुरोश्चरणं प्रपद्ये

पात्रं गुरुं वरवरं परमं गुरूणाम् ॥ १॥

श्रीमन् निदान जगतां निखिलाण्डजात-

निर्वाहशक्तिमुखदिव्यगुणैकतान ।

अत्यन्तभोग्यनतदोष निरस्तदोष

गोविन्दराज चरणौ शरणं प्रपद्ये ॥ २॥

रेखारथाङ्गसरसीरुहवज्रशङ्क-

च्छत्राङ्कुशप्रभृतिमङ्गलचिह्नगर्भौ ।

संसारतापहरणे निपुणौ नतानां

गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ३॥

पश्यत्सु सान्द्रभयकौतुकमर्भकेषु

प्रौढेषु सत्सु कृतकृत्यपरायणेषु ।

विध्वंसितोर्ध्वशकटावपि बालभावे

गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ४॥

आलम्ब्य बाहुयुगलेन कुमारभावे
गाढं कराङ्गुलियुगं किल नन्दपत्न्याः ।
अभ्यस्यमानदशचङ्क्रमणाभिरामौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ५॥

घोषाङ्गनाकरसरोरुहतालनाद-
संगीतसंपदनुरूपमनोज्ञनृत्तौ ।
माणिक्यनूपुरमरीचिकृताङ्गलेपौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ६॥

कुट्टाकतामुपगतौ सरसः प्रसह्य
मध्येसरित्सलिलमुद्धतकालियस्य ।
तत्सुन्दरीनयननन्दनसंनिवेशौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ७॥

वासांसि देहि तव कृष्ण वशंवदाना-
मस्माकमाकुलधियामिति गोपकन्याः ।
उद्दिश्य यौ विदधुरञ्जलिमा प्रसादाद्
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ८॥

गोरक्षणे किल बभूव यदीयरेणु-
रक्रूरमस्तकमणेः सरणिं समेतः ।

तावद्भुतावनुपमावतिपावनौ ते
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ९॥

मल्लावहे मधुरया मधुराङ्गनानां
फुल्लारविन्ददलतल्लजलोचनानाम् ।
वाण्या प्रशंसितपरार्ध्यगतिप्रकारौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ १०॥

कंसं निपात्य कनकासनतः पृथिव्या-
मुद्धृत्य सागसमनागसमुग्रसेनम् ।
राज्येऽभिषिच्य विनिवारितभूमिभारौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ ११॥

दुर्योधने दुरभिमानिनि दुर्भगाणा-
मग्रेसरे भजति ते शिरसः प्रदेशम् ।
धन्येन यन्निकटतः स्थितमर्जुनेन
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ १२॥

सारथ्यवेषसमलंकृतपाण्डुसूनो-
र्युद्धाङ्गणोज्ज्वलरथाञ्चलसंनिवेशौ ।
सान्द्रेन्द्रनीलपरिभावुकभव्यरूपौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ १३॥

भक्त्या प्रसन्नहृदयेन धनंजयेन
यत्रार्चितानि कुसुमानि शिवोत्तमाङ्गे ।
साक्षात्कृतानि सहसाद्भुतवैभवौ तौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ १४॥

अस्मद्गुरुप्रभृतिभिः कमलावसानै-
रादर्शितौ करुणया मम देशिकेन्द्रैः ।
सत्त्वोत्तरैः सकलजीवदयापरैस्तै-
र्गोविन्दराज चरणौ शरणं प्रपद्ये ॥ १५॥

अस्मात्पितामहमशेषगुणाभिराम-
माचार्यरत्नमयि वादिभयंकरार्यम् ।
गोवर्धनाद्रिधृतिधारितगोप वीक्ष्य
गोविन्दराज मम दुर्लपितं क्षमस्व ॥ १६॥

। इति श्रीगोविन्दराजप्रपत्तिः संपूर्णा ।

Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

The author was the grandson of VAdibhayamkarAchAryA,

as is stated in the last verse; nothing more is known of

him, even his name. The stotra is on the God at Tirupati, and is on the

model of the well-known ve.nkaTeshvaraprapatti.

Please send corrections to sanskrit@cheerful.com

Last updated ्today

http://sanskritdocuments.org

Govindaraja Prapatti Lyrics in Devanagari PDF
% File name : govindaprapatti.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : hinduism/religion The author was the grandson of Vaadibhayamkaraachaaryaa as is stated in the last verse; nothing more is known of him, even his name. The stotra is on the God at Tirupati, and is on the model of the well-known veNkaTeshvaraprapatti.
% Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu
% Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu
% Description-comments : Hymn to God of Tirupati
% Latest update : October 1, 2001
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website